न तक्र-सेवी व्यथते कदाचित्, न तक्र-दग्धाः प्रभवन्ति रोगाः । यथा सुराणाम् अमृतं द्युलोके, तथा नराणां भुवि तक्रम् आहुः । तक्रं, जल-मिश्रितं दधि, जलीयं दधि तक्रं भवति । यस्मात् दध्नः नवनीतं निर्गच्छति, तेन सह जलं मिश्रितं भवति, तत् जल-मिश्रितं दधि तक्रम् इति उच्यते । तक्र-सेवी, तक्रं सेवते इति तक्र-सेवी । यः नरः तक्रं सेवते, तक्रं पिबति, तक्रं भक्षयति वा, सः तक्र-सेवी । सः नरः कदाचित् न व्यथते । कदाचित्, कदापि, कस्मिन् काले अपि न व्यथते, कष्टं न अनुभवति, व्यथां न प्राप्नोति, कष्टं न प्राप्नोति इति अर्थः। यः नरः तक्रं पिबति सः नरः कस्मिन् काले अपि व्यथां प्राप्नोति न। कस्मिन् काले अपि कष्टं न अनुभवति, व्यथां न प्राप्नोति, दुःखं न अनुभवति इति अर्थः । न तक्र-दग्धाः प्रभवन्ति रोगाः। रोगाः तक्र-दग्धाः तक्रेण दग्धाः, तक्रेण दग्धी-भूताः, तक्रेण दग्धाः सन्तः, दग्धी-भूताः सन्तः, न प्रभवन्ति, न उत्पद्यन्ते, न प्रवर्तन्ते, न पुनः उद्भवन्ति इति अर्थः । यः नरः तक्रं सेवते तक्रं पिबति, सः कदाचित् कष्टं न अनुभवति, यतः सर्वे रोगाः तक्रेण दग्धाः सन्तः न प्रभवन्ति, न पुनः उत्पद्यन्ते । अतः न तक्रसेवी व्यथते कदाचित् । तक्रसेवी मनुष्यः कदाचित् अपि, कस्मिन् काले अपि व्यथां न अनुभवति, कष्टं न अनुभवति । यथा सुराणाम् अमृतं द्युलोके, द्युलोके, स्वर्ग-लोके, सुराणां, देवानां यथा अमृतं भवति । अमृतं, सुधा अमूल्यं भवति, दुर्मूल्यं भवति, सर्व-श्रेष्ठं भवति। तथा भुवि अस्यां पृथिव्यां नराणां मनुष्याणां तक्रम् आहुः, तक्रं कथ्यते । स्वर्ग-लोके देवानां कृते यथा अमृतं महत्व-पूर्णं भवति, दुर्मूल्यं भवति, बहुमूल्यं भवति, तथा एतस्यां पृथिव्यां नराणां कृते मनुष्याणां कृते तक्रम् अपि महत्व-पूर्णं भवति, दुर्मूल्यं भवति, गुणकारी भवति, उपकारी भवति इति अर्थः ।